**SET -2**

# DAV PUBIC SCHOOLS, ODISHA

## PRE-BOARD EXAMINATION , 2023-24

- Please check that this question paper contains **10** printed pages.
- Check that this question paper contains **18** questions.
- Write down the Serial Number of the question in the left side of the margin before attempting it.
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed 15 minutes prior to the commencement of the examination. The students will read the question paper only and will not write any answer on the answer script during this period.

## कक्षा - दशमी

## संस्कृतम् (सम्प्रेषणात्मकम्)

## कोड् सङ्ख्या-119

**समयः -3 होराः** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **10** पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **18** प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति।

| | | | |
|---|---|---|---|
| 'क' भागः | : | अपठितावबोधनम् | **10** अङ्काः |
| 'ख' भागः | : | रचनात्मककार्यम् | **15** अङ्काः |
| 'ग' भागः | : | अनुप्रयुक्तव्याकरणम् | **25** अङ्काः |
| 'घ' भागः | : | पठितावबोधनम् | **30** अङ्काः |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् □र्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्न□त्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं □ठनीयाः।

**'क' भागः**

**अपठितावबोधनम् (10 अङ्काः)**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 10**

कश्चन बालकः आसीत् । तस्य पिता अतीव निर्धनः आसीत् । बालकः अध्ययनं कर्तुम् इच्छति स्म । किन्तु यस्मिन् गृहे उदरपूर्ति-समस्यायाः एव उत्तरं न आसीत् तत्र तस्य अध्ययनाय व्यवस्था कथं भवेत् ? अतः बालकः विद्यालयं गच्छतः स्वसमवयस्क-बालकान् दृष्ट्वा दुःखेन निश्वसिति स्म । सः बालकः स्नेहपरः, मृदुभाषी, उत्साहमूर्तिः च आसीत् । पित्रा सह कार्यं कुर्वन् सः बहूनां बालानां मैत्रीं सम्पादितवान् । ते बालाः तम् अक्षराणि अपाठयन् । अक्षराभ्यासं कृत्वा अन्यैः व्यवहृतपूर्वाणि पुस्तकानि पठन् शब्दज्ञानादिकं प्राप्तवान् सः । 'पुत्रः विद्यालयं प्रति प्रेषणीयः' इति पितुः अपि तीव्रा इच्छा आसीत् । किन्तु निर्धनता - जन्या असहायता तं बाधते स्म । अधिक-धनार्जनस्य आशया सः कदाचित् पुत्रेण सह कोलकातानगरं प्रति प्रस्थितवान् । रेलयानेन गमनाय धनं नासीत् अतः तौ पादाभ्याम् एव प्रस्थितवन्तौ ।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2**

(i) बालकस्य पिता कीदृशः आसीत् ?

(ii) तौ कथमेव प्रस्थितवन्तौ ?

(iii) बालकः कान् दृष्ट्वा दुःखेन निश्वसिति स्म ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4**

(i) पितरं का बाधते स्म ?

(ii) सः बालकः कीदृशः आसीत् ?

(iii) पित्रा सह कार्यं कुर्वन् सः किं सम्पादितवान् ?

**इ. अस्य अनुच्छेदस्यकृते समुचितं शीर्षकं संस्कृतेन लिखत । 1**

**ई.निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्)**

**1×3=3**

(i) 'सः स्नेहपरः, मृदुभाषी, उत्साहमूर्तिः च आसीत्।' -अस्मिन् वाक्ये क्रियापदं किम् अस्ति ?

(क) स्नेहपरः (ख) च (ग) आसीत् (घ) उत्साहमूर्तिः

(ii) ' तीव्रा' इति विशेषणपदस्य विशेष्यपदं किम् ?

(क) जन्या (ख) निर्धनता (ग) असहायता (घ) इच्छा

(iii) ' कटुभाषी ' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) उत्साहमूर्तिः (ख) स्नेहपरः (ग) मृदुभाषी (घ) दुःखेन

(iv) ते बालाः तम् अक्षराणि अपाठयन् । - अस्मिन् वाक्ये 'अपाठयन्' क्रियायाः कर्तृपदं किं प्रयुक्तम् ?

(क) तम् (ख) ते (ग) बालाः (घ) अक्षराणि

**'ख' भागः**

**रचनात्मककार्यम् ( 15 अङ्काः)**

2. **भवतः नाम केशवः अस्ति । भवान् जलसंरक्षणस्य महत्त्वं वर्णयन् मित्रं गोविन्दं प्रति पत्रं लिखति । तदर्थं मञ्जूषायां प्रदत्तैः पदैः पत्रं पूरयित्वा पुनः लिखत- ½×10=5**

(i) ---------

दिनाङ्कः- ---------

प्रियमित्र (ii) ---------!

सप्रेम नमस्ते । अत्र कुशलं तत्रास्तु । भवतः पत्रं पठित्वा अहम् अतीव प्रसन्नताम् अनुभवामि यतोहि भवान् स्वमित्रैः (iii) -------- जलसंरक्षणप्रचारकार्ये रतः अस्ति । एषः तु उत्तमः (iv) ----- अस्ति । वयं सर्वे एव (v) --------- यत् जीवने जलस्य महत्त्वं तु अतुलनीयम् । जलम् एव (vi) --------- इति प्रसिद्धं वाक्यम्, परं तथापि वयम् अस्य (vii) --------- कुर्मः । अनेन आगामिकाले कियान् भीषणाजलसङ्कटः भवेत् इति कोऽपि न (viii) --------- । जलसंरक्षणार्थं जागरूकता अनिवार्या एव । यदि जनाः अस्मिन् विषये ध्यानं न दास्यन्ति तर्हि अस्माकं (ix) --------- स्थितिरपि अफ्रीकादेशवत् भविष्यति । अतः जलसंरक्षणार्थं चिन्तनम् आवश्यकम् अस्ति । शेषं सर्वं कुशलम् । भवतः पितृचरणयोः मम चरणवन्दना कथनीया। अनुजाय च स्नेहरशिः।


भवदीयः मित्रम्

(x) ---------

**मञ्जूषा**

| |
|---|
| अपव्ययं , परीक्षाभवनतः, सह, प्रयासः, जीवनम्, विचारयति, केशवः, जानीमः,देशस्य, गोविन्द |

**3.प्रदत्तचित्रं दृष्ट्वा मञ्जूषाप्रदत्तशब्दानां सहायतया पञ्चवाक्यानि लिखत – 1×5=5**



**मञ्जूषा**

| |
|---|
| रथम्, श्रीकृष्णः, अर्जुनः, उपदिशति, श्रृणोति, करबद्धः, तिष्ठति, रथे, अश्वाः, महाभारतस्य |

**अथवा**

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - 1x5=5**

**"क्रीडा-महत्त्वम्""**

**मञ्जूषा**

| |
|---|
| महत्त्वपूर्णम्, सर्वेभ्यः, अनिवार्यम्, स्वास्थ्याय, जीवनम्, संयमः, स्थानम्, सफलाः, जनाः, क्रीडा |

**4. अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत- ½×10=5**

एकस्मिन् (i) -------एकः (ii)------असत्यवादी च बालकः वसति स्म । तस्य नाम श्यामः (iii) --------। सः सर्वदा ग्रामीणजनान् तुदति स्म । उपहासेन (iv)-------- कथयति स्म -सिंहः आ□ तः,सिंहः आ□ तः, माम् रक्षत । सर्वे ग्रामीणजनाः अपि तस्य (v) --------धावन्ति स्म । श्यामः तान् अवदत् - अहं युष्मान् मूर्खान् अकरवम् । 'सर्वे तस्मै अक्रुध्यन् । एकदा साक्षात् सिंहः तस्य समीपम् आ□ च्छत् । (vi)-------- सहायतायै सर्वान् आह्वयति स्म । (vii)------- दिने (viii)--------------न आ□ च्छत् । परिणामतः (ix)-------- तम् अमारयत् । अतएव उक्तम्- असत्यं(x)----------- न वक्तव्यम् ।

**मञ्जूषा**

| |
|---|
| आसीत्, सिंहः, सर्वदा ,ग्रामे, धूर्तः, रक्षायै, कदापि, सः, तस्मिन्, कोऽपि |

**अथवा**

**अधोलिखितं सम्वादं मञ्जूषायाः सहायतया पूरयत- 1×5=5**

प्रवीरः - श्वः अस्माकं समावर्तनसंस्कारः भविष्यति । न जाने कथं द्रुत□ त्या वर्षाणि व्यतीतानि ।

अतुलः - (i) ------------?

प्रवीरः - अहं तु अभियन्त्रविज्ञानं पठिष्यामि ।

देवेशः - मया तु चिकित्साविज्ञानं पठिष्यते ।

नीलिमा -(ii) ------------ ।

वैष्णवी - अहं "मधुबनीचित्रकला" इत्यस्य प्रशिक्षणं प्राप्य कुटीरोद्योगं चालयिष्यामि । मह्यं चित्राङ्कनम□अतीव रोचते ।

अतुलः - (iii) ------------ ।

मण्डनः- अहो ! कीदृशम□आश्चर्यम□? (iv) ------------ ।

देवेशः - मण्डन ! तव गणितक्षेत्रे दक्षतां दृष्ट्वा त्वयि भविष्यस्य गणितज्ञं पश्यामि अहम□। त्वं कृषिकार्यं करिष्यसि ?

मण्डनः - (v) ------------।

अवनीशः - सम्यक□कथितम□। अधुना तु सर्वकारेण भूमिस्वास्थ्यपत्रम□अपि प्रदीयते येन भूमिस्वास्थ्यपरीक्षणं भवति ।

सर्वे - भूमेः अपि स्वास्थ्यस्य परीक्षणम□? (हसन्ति)

अवनीशः- अथ किम□? भूमेः अपि स्थास्थ्यपरीक्षणं कर्तव्यम□।

**मञ्जूषा**

- द्वादशकक्षानन्तरं त्वं कस्मिन् क्षेत्रे भविष्यनिर्माणं करिष्यसि ?
- अथ किम्? वैज्ञानिकरीत्या कृषिकार्यं कृत्वा अहं देशस्य कृषिसम्पदः विकासे योगदानं करिष्यामि।
- अहो महदाश्चर्यम् ! कक्षायाः सर्वाधिका मेधाविनी छात्रा चित्रकलाक्षेत्रे भविष्यनिर्माणं करिष्यति ?
- अहं वस्त्रालङ्करणविज्ञानं पठिष्यामि ।
- अहमपि कृषिविज्ञानं पठित्वा कृषिकार्यं करिष्यामि।

**'ग' भागः**

**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत -(केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) मनसः निग्रहं **वायोरिव** सुदुष्करं भवति ।

(ii) राज्ञः स्वेषु **गात्रेषु+अपि** निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम् ।

(iii) **क्रोधाद् भवति** सम्मोहः।

(iv) **प्रियच्छात्राः** ! अभिनन्दनं भवताम् अस्मिन् प्रदेशे।

(v) **विचित्रः+ स्वप्नः** मया दृष्टः ।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) **साधूवृत्तिं** समाचरेत्।

(क) साधोः वृत्तिं (ख) साधू वृत्तिं (ग)साधूनां वृत्तिं (घ) साधवे वृत्तिं

(ii) **अवक्रता** यथा चित्ते तथा वाचि भवेद् यदि ।

(क) न अक्रता (ख) न वक्रता (ग) अन् वक्रता (घ) अन् अक्रता

(iii) सर्वेषामपि महत्त्वं विद्यते **समयम् अनतिक्रम्य** ।

(क) समयं यथा (ख) यथासमयम् (ग) समयानुसारम् (घ) यथासमयः

(iv) ततः प्रविशतः **व्यासः च नारदः च** ।

(क) व्यासनारदयोः (ख) व्यासनारदौ (ग) व्यासनारदाः (घ) व्यासनारदः

(v) तौ **दम्पत्ती** परस्परम् अवलोकयन्तौ अतिष्ठाताम् ।

(क) दमः च पतिः च (ख) जाया च पतिः च (ग) दमस्य पतिः (घ) पतेः च दमः च

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) अरुणाचलप्रदेशे भवतां सर्वेषां **हृद+ ठक्** स्वागतम् ।

(क) हार्दिकः (ख) हार्दिकी (ग) हार्दिकं (घ) हार्दिकेन

(ii) महात्मनः तदेव **<u>समत्वम्</u>** इति आहुः ।

(क) सम + मतुप्  (ख) सम+ तल्  (ग) सम + त्वम्  (घ) सम+ त्व

(iii) कथं **<u>मन्दभाग्या</u>** अहं धैर्यं धारयामि ।

(क) मन्दभाग्य + ङीप्  (ख)मन्दभाग्य + टाप्

(ग) मन्दभाग्य + मतुप्  (घ)मन्दभाग्य+ ठक्

(iv) **<u>कीदृशी</u>** इयं क्लेशपरम्परा ?

(क) कीदृश + टाप्  (ख) कीदृश + मतुप् (ग) कीदृश +ङीप् (घ)कीदृश+ ठक्

(v) विद्वांसः एव **<u>चक्षुष् +मतुप्</u>** प्रकीर्तिताः ।

(क) चक्षुष्वान्  (ख) चक्षुष्यन्तः (ग) चक्षुष्वन्तः  (घ) चक्षुष्मन्तः

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं सम्वादं पुनः लिखत - (केवलं प्रश्नत्रयम्)** **1x3=3**

दिवाकरः - कमले ! किं (i)------ क्रीडितुं गच्छसि ?

□ मला- नहि । मया तु (iii)--------- स्मर्यते ।

दिवा□ रः - अस्तु ! □ं त्वया गृहे एव (iii)------- ?

□ मला - आम्। (iv)------- गृहे एव तिष्ठामि ।

**मञ्जूषा**

| अहं, त्वं , स्वपाठः, स्थीयते |
|---|

**9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) अहं _____________ (5.30 ) वादने विद्यालयात् आगच्छामि।

(ii) प्रातः ______________ (7.00 ) वादने ईशप्रार्थनां □ रोमि ।

(iii) ते _____________ (12.45) भोजनं □ुर्वन्ति।

(iv) सः _____________ (9.15) विद्यालयं गच्छति।

**10. मञ्जूषाप्रदत्तैः उचित-अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) □ थं माम् ------------ अधिक्षिपसि ?

(ii) यथा चित्ते अवक्रता --------- यदि वाचि भवेत् ।

(iii) अग्निः ---------- दहति माम् अयं शो□ ः ।

(iv) ------------ विषादं त्यक्त्वा उद्यमः क्रियताम् ।

(v) वनौषधोनां तु अयं स्त्रोतः ----------अस्ति ।

**मञ्जूषा**

| इव, एव, तथा, अपि, इदानीं |
|---|

**11. अधोलिखितवाक्येषु रेखाङ्कित -अशुद्धपदाय उचितपदं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नत्रयम)□** **1x3=3**

(i) सर्वे मिलित्वा गायसि ।

(क) गायति (ख) गायामि (ग) गायन्ति (घ) गायथ

(ii) यूयम् अस्य मनोहरप्रदेशस्य विषये ज्ञातुम् इच्छामः ।

(क) आवाम् (ख) वयम् (ग) युवाम् (घ) ते

(iii) बुद्धिमान् सा अवदत् ।

(क) बुद्धिमानः (ख) बुद्धिमत् (ग) बुद्धिमती (घ) बुद्धिवती

(iv) □ुरा कस्मिंश्चित् नगरे चन्द्रो नाम भू□तिः अस्ति ।

(क) आस्ताम् (ख) आसीत् (ग) भवति (घ) भविष्यति

**'घ' भागः**

**पठितावबोधनम् (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **5**

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- 'भो ! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान्- रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ । अहं तु वनं गच्छामि । अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः । ऊर्णाप्रचुरः मेषः वह्निनाजाज्वल्यमान शरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति । तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः ।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) मदोद्धताः के आसन□?

(ii) कः सगद्गदम□उक्तवान□?

(iii) वह्निज्वालाः कुत्र समुत्थिताः ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1 ×2=2**

(i) साश्रुनयनो यूथपतिः सगद्गदं किम□उक्तवान□?

(ii) मेषः किमर्थं भूमौ लुठति ?

(iii) कीदृशः मेषः अश्वशालां प्रविशति ?

**इ. यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **1 ×2=2**

(i) 'अवदन'□क्रियापदस्य किं कर्तृपदं प्रयुक्तम□?

(ii) 'यूथपतिः' इति पदस्य किं विशेषणपदं प्रयुक्तम□?

(iii)'भूमौ' इत्यस्य किं पर्यायपदं प्रयुक्तम□?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - 5**

चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥
य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च
न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2=1**

(i) अस्मिन् श्लोके सम्बोधनपदं किम् ?

(ii) चञ्चलं किम् अस्ति ?

(iii) मनुष्यः आत्मनः किम् इच्छति ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 ×2=2**

(i) मनः कीदृशम् अस्ति ?

(ii) मनसः वशीकरणं केन समं दुष्करम् ?

(iii) यः आत्मनः श्रेयः इच्छति सः किं न कुर्यात् ?

**इ. यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 ×2=2**

(i) अस्मिन् श्लोके " **सुखानि**" इति पदस्य विशेषणपदं किम् ? पदस्य विशेषणपदं किम् ?

(ii) "**सरलम्**"इति अस्य पदस्य किं विलोमपदम् अत्र श्लोके प्रयुक्तम् ?

(iii) अस्मिन् श्लोके "**मन्ये**"इति क्रियापदस्य कर्तृपदं किम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - 5**

मयूरः -(प्रविश्य, साट्टहासम्)सत्यं सत्यम् । अहमेव राष्ट्रपक्षी । कः न जानाति तव ध्यानावस्थाम्? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि । धिक् त्वाम् । अवमानितं खलु सर्वं पक्षिकुलं त्वया ।

बकः - रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि?

मयूरः - श्रूयताम्, श्रूयताम् ।मम नृत्यं तु प्रकृतेः आराधना । पश्य चारुवर्तुलचन्द्रिका-शोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम् । मम केकारवं श्रुत्वा कोकिलः अपि लज्जते । मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः ।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2=1**

i. केन सर्वं पक्षिकुलम् अवमानितम्?

ii. मयूरस्य केकारवं श्रुत्वा कः लज्जते?

iii. साट्टहासं कः प्रविशति?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 ×2=2**

i. कः मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयति ?

ii. कस्य शिरसि शिखां स्थापयता विधात्रा एव पक्षिराजः कृतः ?

iii. कस्य नृत्यं प्रकृतेः आराधना भवति ?

**इ. यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **1 ×2=2**

i. वराकान् मीनान् - अत्र कः विशेष्यः ?

ii. मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि । - अस्मिन् वाक्ये किं क्रियापदम् ?

iii. 'चारुवर्तुलचन्द्रिकाशोभितानाम्' इति कस्य पदस्य विशेषणम् ?

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत- (केवलं पञ्चप्रश्नाः)** **1x5=5**

(i) सूर्योदये **<u>तमः</u>** नश्यति ।

(ii) **<u>विषादं</u>** त्यक्त्वा उद्यमः क्रियताम् ।

(iii) जीवनं च **<u>रसमयं</u>** कुरुध्वम् ।

(iv) **<u>साधूनां</u>** चित्ते वाचि च सरलता भवति ।

(v) पाठकस्य **<u>षट्</u>** गुणाः सन्ति ।

(vi) **<u>अरुणस्य</u>** प्रदेशः अरुणाचलः।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत -** **½ x4=2**

**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।**
**तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥**

अन्वयः - यथा (i) ----------- चित्ते तथा यदि (ii)----------- भवेत्, (iii)--------- तथ्यतः तदेव (iv)----------- इति आहुः ।

**मञ्जूषा**

| |
|---|
| वाचि, समत्वम्, महात्मानः, अवक्रता |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-**

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं, सः युक्तः सः सुखी नरः ॥

**भावार्थः** – हे अर्जुन ! यः नरः (i) ---------- पूर्वमेव कामस्य (ii) --------- च तीव्रं वेगं (iii) --------- शक्नोति । सः नरः (iv) ---------- सुखी च भवितुं शक्यते ।

**मञ्जूषा**

| |
|---|
| युक्तः,देहत्यागात्, सोढुं, क्रोधस्य |

**17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

i) काकस्य **<u>गात्रं</u>** यदि काञ्चनस्य तर्हि सः काकः एव ।

(क) गोत्रं (ख) शरीरं (ग) नेत्रं (घ) कुटुम्बं

ii) अलम् अलं **<u>मिथः</u>** कलहेन ।

(क) परस्परं (ख) ईदृशः (ग) मिथकः (घ) व्यर्थम्

iii) आपदां **<u>तरणिः</u>** धैर्यम् ।

(क) नौका (ख) सूर्यः (ग) तोरणम् (घ) कोपः

iv) **<u>विद्धि</u>** एनं हि वैरिणम् ।

(क) पश्य (ख) अर्पय (ग) जानीहि (घ) कुरु

v) केन **<u>प्रयुक्तः</u>** पुरुषः पापं चरति ।

(क) प्रकटितः (ख) नीतः (ग) प्रसिद्धः (घ) प्रेरितः

**18. अधोलिखित-कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत -** **½ x8=4**

श्रीकृष्णः युधिष्ठिरं वदति यत् द्रोणिनः समीपे (i)---------- नामकम् अस्त्रम् अस्ति । तस्य प्रयोगेण सम्पूर्णा (ii) –--------- दग्धा भविष्यति । अतः त्वया (iii)---------- एव भीमं सम्प्रेष्य उचितं न कृतम् । सः एकदा मम समीपे (iv)---------- अपि आगच्छत् ब्रह्मशिरः अस्त्रं मह्यं दत्वा स मां (v) –---------अयाचत । मयि पृष्टे सति सोऽकथयत् यत् अहं (vi) –-------- अजेयः स्याम् अतः इदं चक्रं याचितवान् । तदा मया उक्तं यत् अहं ब्रह्मशिरः न इच्छामि त्वमिदं चक्रं ननु गृहाण । परं तत् चक्रम् (vii)---------- सः समर्थः नाभवत् । अतः स (viii)---------- भूत्वा स्वगृहं प्रत्यागच्छत् ।

**मञ्जूषा**

| |
|---|
| संसारे, निराशः, सुदर्शनचक्रम्, ब्रह्मशिरः, एकाकी, पृथिवी, द्वारकाम्, उत्थापयितुमेव |

******************